শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৯৮

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৯৮

*নিষ্কলব্রহ্মোপাসনা*

যস্মিন্নেতদ্বিভাতং যত ইদমভৱদ্যেন চেদং য এত-
    দ্যোঽস্মাদুত্তীর্ণরূপঃ খলু সকলমিদং ভাসিতং যস্য ভাসা।
যো ৱাচাং দূরদূরে পুনরপি মনসাং যস্য দেৱা মুনীন্দ্রাঃ
    নো ৱিদ্যুস্তত্ত্বরূপং কিমু পুনরপরে কৃষ্ণ তস্মৈ নমস্তে॥ ১ ॥

জন্মাথো কর্ম নাম স্ফুটমিহ গুণদোষাদিকং ৱা ন যস্মিন্
    লোকানামূতযে যঃ স্বযমনুভজতে তানি মাযানুসারী।
বিভ্রচ্ছক্তীররূপোঽপি চ বহুতররূপোঽৱভাত্যদ্ভুতাত্মা
    তস্মৈ কৈৱল্যধাম্নে পররসপরিপূর্ণায ৱিষ্ণো নমস্তে॥ ২ ॥

নো তির্যঞ্চং ন মর্ত্যং ন চ সুরমসুরং ন স্ত্রিযং নো পুমাংসং
    ন দ্রৱ্যং কর্ম জাতিং গুণমপি সদসদ্বাপি তে রূপমাহুঃ।
শিষ্টং যত্ স্যান্নিষেধে সতি নিগমশতৈর্লক্ষণাৱৃত্তিতস্তত
    কৃচ্ছ্রেণাৱেদ্যমানং পরমসুখমযং ভাতি তস্মৈ নমস্তে॥ ৩ ॥

মাযাযাং বিম্বিতস্ত্ৱং সৃজসি মহদহঙ্কারতন্মাত্রভেদৈ-
    র্ভূতগ্রামেন্দ্রিযাদ্যৈরপি সকলজগতস্বপ্নসঙ্কল্পকল্পম্।
ভূযঃ সংহৃত্য সর্ৱং কমঠ ইৱ পদান্যাত্মনা কালশক্ত্যা
    গম্ভীরে জাযমানে তমসি ৱিতিমিরো ভাসি তস্মৈ নমস্তে॥ ৪ ॥

শব্দব্রহ্মেতি কর্মেত্যণুরিতি ভগৱন্ কাল ইত্যালপন্তি
    ত্বামেকং ৱিশ্বহেতুং সকলমযতযা সর্ৱথা কল্প্যমানম্।
ৱেদান্তৈর্যত্তু গীতং পুরুষপরচিদাত্মাভিধং তত্তু তত্ত্বং
    প্রেক্ষামাত্রেণ মূলপ্রকৃতিৱিকৃতিকৃত্ কৃষ্ণ তস্মৈ নমস্তে॥ ৫ ॥

www.prapatti.com

সত্ত্বেনাসত্তযা ৰা ন চ খলু সদসত্ত্বেন নিৰ্ৱাচ্যরূপা
ধত্তে যাসাৱৱিদ্যা গুণফণিমতিৱদ্বিশ্বদৃশ্যাৱভাসম্।
ৱিদ্যাত্বং সৈৱ যাতা শ্ৰুতিৱচনলৱৈর্যতকৃপাস্যন্দলাভে
সংসারারণ্যসদ্যস্ত্রুটনপরশুতামেতি তস্মৈ নমস্তে॥ ৬ ॥

ভূষাসু স্বর্ণৱদ্বা জগতি ঘটশরাৱাদিকে মৃত্তিকাৱ-
ত্তত্ত্বে সঞ্চিন্ত্যমানে স্ফুরতি তদধুনাপ্যদ্বিতীযং ৱপুস্তে।
স্বপ্নদ্রষ্টুঃ প্ৰবোধে তিমিরলযৱিধৌ জীৰ্ণরজ্জোশ্চ যদ্ব-
দ্বিদ্যালাভে তথৈৱ স্ফুটমপি ৱিকসেত্ কৃষ্ণ তস্মৈ নমস্তে॥ ৭ ॥

যদ্ভীত্যোদেতি সূর্যো দহতি চ দহনো ৱাতি ৱাযুস্তথান্যে
যদ্ভীতাঃ পদ্মজাদ্যাঃ পুনরুচিতবলীনাহরন্তেনুকালম্।
যেনৈৱারোপিতাঃ প্ৰাঙনিজপদমপি তে চ্যাৱিতারশ্চ পশ্চা-
ত্তস্মৈ ৱিশ্বং নিযন্ত্রে ৱযমপি ভৱতে কৃষ্ণ কুৰ্মঃ প্ৰণামম্॥ ৮ ॥

ত্ৰৈলোক্যং ভাৱযন্তং ত্ৰিগুণমযমিদং ত্ৰ্যক্ষরস্যৈকৱাচ্যং
ত্ৰীশানামৈক্যরূপং ত্ৰিভিরপি নিগমৈর্গীযমানস্বরূপম্।
তিস্ৰোৱস্থা ৱিদন্তং ত্ৰিযুগজনিজুষং ত্ৰিক্ৰমাক্ৰান্তৱিশ্বং
ত্ৰৈকাল্যে ভেদহীনং ত্ৰিভিরহমনিশং যোগভেদৈর্ভজে ত্বাম্॥ ৯ ॥

সত্যং শুদ্ধং ৱিবুদ্ধং জযতি তৱ ৱপুর্নিত্যমুক্তং নিরীহং
নির্দ্বন্দ্বং নির্ৱিকারং নিখিলগুণগণৱ্যঞ্জনাধারভূতম্।
নির্মূলং নির্মলং তন্নিরৱধিমহিমোল্লাসি নির্লীনমন্ত-
র্নিস্সঙ্গানাং মুনীনাং নিরুপমপরমানন্দসান্দ্রপ্ৰকাশম্॥ ১০ ॥

দুৰ্ৱারং দ্বাদশারং ত্ৰিশতপরিমিলতষষ্টিপৰ্ৱাভিৱীতং
সম্ভ্রাম্যত্ ক্রূরৱেগং ক্ষণমনু জগদাচ্ছিদ্য সন্ধাৱমানম্।
চক্রং তে কালরূপং ৱ্যথযতু ন তু মাং ত্বতপদৈকাৱলম্বং
ৱিষ্ণো কারুণ্যসিন্ধো পৱনপুরপতে পাহি সৰ্ৱাময়ৌঘাত্॥ ১১ ॥

**********